श्रीवात्स्यायनप्रणीतम्

# कामसूत्रम्

यशोधरविरचितया जयमङ्गलाख्यया टीकया समेतम्

सम्पादकः
महामहोपाध्यायपण्डितः
श्री दुर्गाप्रसादः

[illegible]
[illegible]

राष्ट्रिय-संस्कृत-संस्थानम्

श्रीः ।

# निवेदनम् ।

श्रीवात्स्यायनमुनिविरचितं कामसूत्रं गुरुदत्तेन्द्रपादाभिधानश्रीयशोधरविरचितया जयमङ्गलाख्यया टीकया समलंकृतमस्मत्पितृचरणैर्महामहोपाध्यायपण्डितवरश्रीदुर्गाप्रसादैः पूर्वं प्रकाशितम् । ग्रन्थस्यास्य नितरां गोपनीयत्वान्मित्रेष्वेव कृतेऽपि प्रचारेऽतीतानि प्रकाशितपूर्वाणि पुस्तकानि । अतएवास्य मया द्वितीयं संस्करणं व्यधायि । ( A. D. 1900 )

एवं संजातेऽपि संस्करणद्वयेऽन्तिमस्यौपनिषदिकाख्यसप्तमाधिकरणस्य टीकायाअनुपलब्धौ नापार्यत सा प्रकाशयितुम्। अधुना च श्रीमद्भिर्विशाखपत्तन(विजगापट्टम)वासिभिरार्यगुरुवरैः श्रीवेङ्कटरङ्गनाथस्वामिभिः सानुकम्पमस्मत्सविधे प्रेषितेति तेभ्यो धन्यवादार्पणपुरःसरं प्रकाश्य वात्स्यायनीयगुणगरिमगम्भीराशयेभ्यः श्रीमद्भ्य उपायनीक्रियते ।

वात्स्यायनकामसूत्रस्यान्यापि श्रीरामचन्द्रसूनुवीरभद्रविरचिता काचन कन्दर्पचूडामणिनामिका टीका समुपलभ्यते । सा च वि. १६३३ संवत्सरे ( A. D. 1577 ) निर्मितेति तदीयान्तिमश्लोकेन स्फुटमवगम्यते ।

तत्रारम्भः ।

वंशः कंसद्विष इव जयति यश्चेलायां भूभुजां मान्यः ।
अज(न)वद्योऽस्ति जगत्यां यस्मादन्यो न भूपालः ॥
प्रादुर्बभूव वंशे तत्र श्रीशालवाहनो नृपतिः ।
इन्दुर्मरन्दबिन्दुर्यस्य पुरा पुण्डरीकस्य ॥

---

(१) ( See catalogue of Sanskrit Mss. of H. H. the Maharaja of Jummu and Kashmir by M. A. Stein. Ph. D. )

(२) ( पद्यान्येतानि Sanskrit Manuscripts of the Maharaja of Bikaner by R. Mitra नामकबीकानेरपुस्तकालयसूचीपत्रत उद्धृतानि )

# कामसूत्रस्य विषयानुक्रमः ।


| पृष्ठाङ्कः । | पङ्क्त्यङ्कः । | प्रकरणाङ्कः । | विषयः । |
|---|---|---|---|
| ९ | ११ | १ | शास्त्रसंग्रहः । प्रथमाध्यायसमाप्तिः । |
| २७ | २ | २ | त्रिवर्गप्रतिपत्तिः । द्वितीयाध्यायसमाप्तिः । |
| ४२ | ३ | ३ | विद्यासमुद्देशः । तृतीयाध्यायसमाप्तिः । |
| ६० | ४ | ४ | नागरकवृत्तम् । चतुर्थाध्यायसमाप्तिः । |
| ७३ | ५ | ५ | नायकसहायदूतीकर्मविमर्शः । पञ्चमाध्यायसमाप्तिः । |
| | | | प्रथमस्य साधारणाधिकरणस्य च समाप्तिः । |
| ९२ | ५ | ६ | प्रमाणकालभावेभ्यो रतावस्थापनम् । |
| ९४ | १९ | ७ | प्रीतिविशेषाः । प्रथमाध्यायसमाप्तिः । |
| १०४ | १५ | ८ | उपगूहनविचाराः । द्वितीयाध्यायसमाप्तिः । |
| ११६ | १ | ९ | चुम्बनविकल्पाः । तृतीयाध्यायसमाप्तिः । |
| १२४ | २२ | १० | नखरदनजातयः । चतुर्थाध्यायसमाप्तिः । |
| १२९ | २ | ११ | दशनच्छेद्यविधयः । |
| १३५ | ३ | १२ | देश्या उपचाराः । पञ्चमाध्यायसमाप्तिः । |
| १४३ | ३ | १३ | संवेशनप्रकाराः । |
| १४७ | २ | १४ | चित्ररतानि । षष्ठाध्यायसमाप्तिः । |
| १५६ | १४ | १५ | प्रहणनयोगाः । |
| १५६ | १५ | १६ | सीत्कृतोपक्रमाः । सप्तमाध्यायसमाप्तिः । |
| १६५ | १३ | १७ | पुरुषायितम् । |
| १६५ | १४ | १८ | पुरुषोपसृप्तानि । अष्टमाध्यायसमाप्तिः । |
| १७७ | ५ | १९ | औपरिष्टकम् । नवमाध्यायसमाप्तिः । |
| १८२ | ४ | २० | रतारम्भावसानिकम् । |
| १८४ | २४ | २१ | रतविशेषाः । |
| १८९ | ७ | २२ | प्रणयकलहः । दशमाध्यायसमाप्तिः । |
| | | | द्वितीयस्य सांप्रयोगिकाधिकरणस्य च समाप्तिः । |

ब्दाद्रत्नाभरणादयः। अर्जनं द्विविधम्। निष्पन्नानां हस्त्यादीनां स्वीकरणम्, अनिष्पन्नानां धान्यादीनां निष्पादनम्। अर्जितस्येत्येकवचनमेकैकस्य द्रव्यस्यार्जनवर्धनयोरन्वर्थोपदर्शनार्थम्। अन्यथा समुदायस्यैवार्जनं वर्धनं चार्थः स्यात्। वर्धनमुपचयभोगादिव्यापारदर्शनार्थम्[1]। तयोः शास्त्रेणोपदिश्यमानत्वात्।

**तमध्यक्षप्रचाराद्वार्तासमयविद्भ्यो वणिग्भ्यश्चेति ॥**

अध्यक्षाः प्रचरन्त्यनेनेत्यध्यक्षप्रचारः। वार्ता शास्त्रम्। तस्माच्छास्त्रे योऽधिकृतः। इतरश्च वार्तासमयविद्भ्यः कृषिपाशुपाल्यवणिज्यादितत्त्वविद्भ्यः। वणिग्भ्य इत्युपलक्षणार्थम्। कर्षकेभ्यो गवादिपोषकेभ्यश्च प्रतिपद्यतेत्येवम्।

**श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वानुकूल्यतः प्रवृत्तिः कामः ॥**

त्वगिति कार्येन्द्रियम्। कायो द्विविधः, सामान्यो विशेषश्च। तत्र सामान्यमाह—आत्मसंयुक्तेन मनसेति। आत्मा समवायिकारणम्। सुखदुःखेच्छाद्वेषप्रयत्नादिगुणानां तत्र समवायात्। तत्र यदास्य प्रयत्नगुण उत्पद्यते तदायं मनसा संयुज्यते। मन इन्द्रियेण। इत्यनेन क्रमेणाधिष्ठितानाम्। स्वेषु स्वेष्विति। तथाक्रमं शब्दस्पर्शरूपरसगन्धेषु। आनुकूल्यत इति। यदात्मनः स्रगादीन्विषयान्भोक्तुमिच्छा भवति तदा प्राप्याप्राप्यकारिणां श्रोत्रादीनां[2] बुद्धीन्द्रियाणामानुलोम्येन या प्रवृत्तिः। इच्छोपगृहीता श्रोत्रादिबुद्धिरित्यर्थः। सा विषयोपभोगस्वभावा काम इत्युपचर्यते। आत्मा हि तद्द्वारेण विषयं भुञ्जानः सुखमनुभवति यत्तत्सुखं प्रधानं कामः। तस्य निबन्धनमिच्छोपगृहीता प्रवृत्तिः। सापि काम इत्युच्यते। तस्माद्धेतुफलभेदात्सामान्यकामो द्विविधः। प्रातिकूल्यतः प्रवृत्तिस्तु दुःखहेतुत्वाद्द्वेषः[3] इत्यर्थोक्तम्।

---

१. 'भूम्यादिव्यापार–' पा०. २. 'श्रोत्रेन्द्रियादीनाम्' पा०. ३. 'द्वेष्यः' पा०.